E-16

Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५४ ख

Title पार्वणश्राद्धं सटीकम्

Author

Extent ८ पत्र Age

Subject धर्मशास्त्र (कर्मकाण्ड)

© Dharmarth Trust. Digitized By eGangotri

पार्वणश्राद्धसटीक

॥५८

८ पत्राणि

© Dharmarth Trust. Digitized By eGangotri

पार्वणश्राद्धसटीक पु. प.८ श्लो. ३८४

नं ५८

© Dharmarth Trust. Digitized By eGangotri

ॐ श्रीगणेशाय नमः ॥ पितृभ्यो नमः ॥ विधाय वंदनं विष्णोः सुबोधायाधिकारिणां कुर्वे पार्वणश्राद्धस्य विवृत्तिं वाक्यसंमितां ॥
१ ॥ श्राद्धं कुर्वन्ति ये मर्त्याः श्रद्धावंतो मुनीश्वराः न तेषां संततिच्छेदः संपन्नाशोपि जायते इति नारदीयवाक्येन श्राद्धकृतः फल
श्रवणात्कर्तव्यत्वे प्राप्ते सति कस्मिन्काले विधेयमिति जिज्ञासायां तावत्कालनिर्णयमाह ॥ विष्णुः ॥ अमावास्या तिस्रोष्ट
का तिस्रोन्वष्टका माघी प्रोष्ठपद्यूर्ध्वकृष्णात्रयोदशी व्रीहियवपाकौ चेति ए तांस्तु श्राद्धकालान्वै नित्यानाह ॥ प्रजापतिः ॥
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥ ब्रह्मपुराणवाक्यमपि ॥ अश्वयुज्यां तु कृष्णायां त्रयोदश्यां मघासु च प्रावृट्
तो यमः प्रेतान् पितॄंश्चापि यमालयात् विसर्जयति मानुष्यं कृत्वा शून्यं स्वकं पुरं १ कन्यागते सवितरि यान्यहानि तु षोड
श क्रतुभिस्तानि तेषु दत्तं मयाक्षयम् १ मनुरपि ॥ अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने त्रिभागहीनं पक्षं वा त्रि
भागं त्वर्द्धमेव चेत्येवमेषु तत्तदुपाध्यवच्छिन्नेषु कालेष्वाग्नेषु सत्स्वप्येतान्यादि नित्यं नैमि त्तिकं काम्यं ॥ वृद्धिश्राद्धं
तथैव च ॥ पार्वणं चेति ॥ मनुना श्राद्धं पंचविधं स्मृतमिति ॥ रहस्ये तूक्तपंचविधेषु श्राद्धेषु ...क पार्व
णश्राद्धस्य नित्याद्यनंतरत्वादथेति । नित्यादिश्राद्धकथनादनंतरमिति मंगलानंतरारंभप्रश्नकार्त्स्न्ये
ष्वथेति कोशात्तु स्वन... थित्वेप्यऽऽ नंतरार्थत्वं तदनंतरं भावितादित्यर्थः योग्यभाजनयोः पात्रमिति कोशात्
पात्रशब्देनात्र ब्राह्मणो गृह्यते यत्र प्रत्यक्षतया संकल्पं गृह्णाति तत्पात्रकं तदभावे सत्यपात्रकमित्यपि ॥
स्मृतिराह ॥ यत्र संकल्पितं द्रव्यं ब्राह्मणश्चाक्षगोचरः यत्र गृह्णाति तत्प्रोक्तं विशेषेण सपात्रकं एतत्प्रकार
हीनं हि विज्ञेयं तदपात्रकमित्यतो पात्रकमिति साक्षात्त्यागप्रदानरहितमित्यर्थः ॥ पार्वणश्राद्धमिति ॥ पर्व
णि भवं पार्वणमिति व्युत्पत्तिमात्रपर्यंत दर्शस्तु देवश्राद्धपूर्वकं षट्पुरुषश्राद्धं पार्वणश्राद्धमित्येकोद्दि
ष्टं न कुर्वन्ति न्याहिताग्नेश्चैव सर्वदा अहन्यकाद्देशप्राप्ते पार्वणं तु विधीयते ॥ इत्यादि स्मृतिषु पर्वाति

पा॰

शिव॰
१

© Dharmarth Trust. Digitized By eGangotri

रिक्तकाले विधिश्रवणात्तस्य प्रयोगः प्रकारो येन विधिना क्रियते तदुच्यते ॥ इत्यर्थः तत्रादौ श्राद्धपूर्वदिने कर्तुः कर्तव्य
त्वमाह ॥ निमंत्रितान् हि पितर उपतिष्ठंति तान् द्विजान् वायुवच्चानुगच्छंति तथासीनानुपासत इति स्मृतेः ॥ निमंत्र
णप्राप्तिसत्यां कर्त्रीकृत स्नानादिकः दर्भपाणिस्सन्पूर्वेद्युः ब्राह्मणान्निमंत्रयेत् तथा च नारदः ॥ विप्रांस्तु श्राद्धे पूर्वेद्युः स्ना
त्वा त्वेकाशनो भवेत् अधः शायी ब्रह्मचारी निशि विप्रान्निमंत्रयेत् ॥ १ ॥ निमंत्रयेत्तु द्विजं प्राज्ञं दर्भपाणिर्जितेन्द्रिय इति ।
। तद्दिने पि निमंत्रयेदित्यत्रापि वाक्यांतरं निमंत्रयेत् पूर्वेद्युः तस्मिन्नेव दिनेथवा देवलोपि ॥ असंभवे परेद्युर्वा ब्राह्म
णान्सान्निमंत्रयेदित्यवाशब्दो व्यवस्थायां पितृसंभिन्नो ब्राह्मणान्पूर्वेद्युरितरान्नद्य इत्यर्थः अत्रापि मार्कंडेयवाक्यं ।
निमंत्रयेत्पूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान् अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनं इति श्राद्धे श्रोत्रियत्वाद्युपच्छिन्नं
विप्रं नियोजयेत् ॥ तथा च नारदीयवाक्यं ॥ श्राद्धे निमंत्रयेद्विप्रं श्रोत्रियं विष्णुतत्परं यथास्वाचारनिरतं प्रशांतं सत्कुलोद्भवं
देवपूजारतं चैव स्मृतेरर्थविशारदं वेदांततत्त्वसंपन्नं सर्वलोकहितेरतं कृतज्ञं गुणसंपन्नं गुरुशुश्रूषणेरतं परोपदेश ।

॥ ॐ ॥ अथाऽपात्रकपार्वणश्राद्धप्रयोगः ॥ ॐ ॥

निरतं सच्छास्त्रकथने रत इत्यादि गुणविशिष्टं निमंत्रयेत्तदतिरिक्तं कुष्ठी कुनखी दुष्टलंककर्णः त्यक्तव्रतः नक्षत्रपाठ
जीवी च कालश्च शवदाहकः असच्छास्त्राभिनिरतः परान्ननिरतोशुचिः कुसीदी परिवेत्ता च निंदकः ग्रामयाजकः
कुंडश्च गोलको धूर्तः ग्रामारण्यप्रदाहकः नित्यं राज्ञोपसेवी च कृतघ्नः कितवो नटः शूद्रशिष्यः कांड
पृष्ठः वृषलीपतिरेव चेत्यादि वाक्यनिषिद्धं न निमंत्रयेदिति ॥ मनुना [illegible] प्युक्तं ॥ न ब्राह्मणं परीक्षेत दैवे
कर्मणि धर्मवित् पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः इत्यतः परीक्ष्य निमंत्रणं श्रेष्ठं कांडपृष्ठस्यार्थस्तु
॥ स्वकुलं पृष्ठतः कृत्वा यो वैश्यान्यकुलं व्रजेत् तेन दुश्चरितेनासौ कांडपृष्ठ इति स्मृत इति ॥ वंध्या तु वृष
ली ज्ञेया वृषली च मृतप्रजा अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥ इति वृषल्यर्थः ॥ सत्यपि हि त्यर्थः ॥
निमंत्रणमपि प्रथममपि तु ब्राह्मणानां पश्चाद्दैविकानां कर्तव्यं ॥ तथा च देवलः ॥ श्वः कर्तास्मीति निश्चि
त्य दाता विप्रान्निमंत्रयेत् कृतापसव्यः पूर्वेद्युः पितृपूर्वं निमंत्रयेत् ॥ यत्तु वृद्धस्य तिवचनं ॥ उपवीति
ततो भूत्वा देवतार्थं द्विजोत्तमान् अपसव्येन पित्रे च स्वयं [illegible] व्याथवा सुत ॥ इति तत्पूर्वपश्चाद्भावयोरश्र
वणात् देवल ॥ प्रचेतसोक्तक्रमो नापि ज्ञेया ये चा दैवाद्यंते तदीदेत पित्राद्यंते न तद्भवेत् पित्राद्यंतं त्वी

॥ ॐ ॥

© Dharmarth Trust. Digitized By eGangotri

मनुवचनादेव विप्रनिमंत्रणं पूर्वमित्युक्तं यतः एतच्च पूर्वेद्युर्निमंत्रणं गृहलेपाद्युपलक्षणं तथाच वाराहपुराणे ॥ जा
टी॰ २ नुमालभ्य अत्र शौचादि कर्तव्यं श्वः कर्तास्मीति जानता स्थानोपलेपनं भूमेः कृत्वा विप्रान्निमंत्रयेदिति निमंत्रणप्रकारो म
त्स्य=३ त्स्यपुराणे ॥ दक्षिणं जानुमालभ्य त्वं मयात्र निमंत्रितः एवं निमंत्र्य नियमान्श्रावयेत् पैतृकान् बुध इति पैतृकान्निय
मान् ॥ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि इत्यादीत्यर्थः आसा नि=
२ दिभिः कृतं तत्र देवलः ततो निवृत्ते मध्याह्ने लूनरोमनखान् द्विजान् अभिगम्य यथापूर्वं प्रयच्छेत् स्नानसाधनमि
ति १ स्नानसाधनं तैलोद्वर्तनं जलादिकं स्नानार्थं दद्यादित्यर्थः ब्राह्मणो निमंत्रितो ब्रह्मचर्याद्युक्तो भवेत् तथा
च नारदः निमंत्रितो भवेद्विप्रो ब्रह्मचारी जितेंद्रियः निमंत्रितस्त्रीसंभोगादौ दोषमप्याह ॥ नारद ॥ श्राद्धे निमंत्रि
तो यस्तु व्यवायं कुरुते यदि ब्रह्महत्यामवाप्नोति नरकायोपपद्यत इति १ मातृपित्रोर्यदा श्राद्धं भक्त्या कुर्वन्नुतयेह
नि राजसूयाश्वमेधाभ्यां फलं तदधिकं भवेदिति ॥ पुराणसमुच्चये ॥ क्षयदिने श्राद्धकरणस्य फलमभिधाय
व्य॒= त्तद्दिनकर्तव्यमाह ॥ ततः प्रातः समुत्थाय कल्यं कर्म समाप्य च श्राद्धं समाचरेद्विद्वान् काले कुतपसंज्ञके १
दिवसस्याष्टमे भागे यदा मंदायते रविः स कालः कुतपो नाम पितॄणां दत्तमक्षयम् २ अपराह्णस्तु पितॄणां
लः= दत्तकालः स्वयंभुवा तत्काल एव दातव्यं वाक्यं तस्माद्द्विजोत्तमैः ३ पूर्वाह्णे दैविकं कार्यमपराह्णे तु पार्वणं ॥

॥ श्री ॥ अपराह्णे स्नातः ॥ श्री ॥

एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमित्यादिवाक्येभ्यः ॥ अपराह्ण इति ॥ अपराह्णः अपरो भागो द्वितीयो
भागो मध्याह्नात्परतरः काल इत्यर्थः ॥ तत्र मनुः ॥ मध्याह्नात्परतः कालः कुतपोऽयमुदाहृत इत्येतस्यै
वास्य कालत्वात्तद्व्यतिरिक्तस्य तु यत्कव्यं दीयते विप्रैरकाले मुनिसत्तमाः राक्षसं तद्धि विज्ञेयं पितॄणां
नोपतिष्ठते १ रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते इति ॥ =
इति नारद मनुः ॥ उक्तवाक्यादिना निषिद्धत्वादिति अचिरोदिते दिनोपक्रममुहूर्तद्वय इत्यर्थः न मु
क्तकेशो नास्नातः श्राद्धं कुर्वीत मानवः स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि इत्यादिवाक्येभ्यः स्नात
इति ॥ तत्र देवलः ॥ प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः उदङ्मुखो वा दैवत्ये पैतृके दक्षिणा
मुखः तथा प्रचेतः श्राद्धकृत् शुक्लवासाः स्यात् ॥ ततः शुक्लेति ॥ देवार्चाचमनस्नानव्रतश्राद्धक्रिया
दिषु न भवेन्मुक्तकेशश्च नैकवस्त्रधरस्तथेत्याद्यनुशासनात् ॥ द्विवासा इति ॥ शुक्ले शुभे देवा

श्राव॰ २

© Dharmarth Trust. Digitized By eGangotri

तस्यादूर्ध्वशिखः ॥ जपहोमोपवासेषु धौतवस्त्रः सदा भवेत् अलंकृतः शुचिर्मौनी श्राद्धादौ विजितेंद्रियः ॥ अतः शु
चिरिति ॥ एकवस्त्रलक्षणमाह ॥ शातातपः ॥ सव्यादंसात्परिभ्रष्टं कट्यां चिद्धिरतां वेवरं एकवस्त्रं तु तं विद्या
द्दैवे पित्र्ये च वर्जयेत् इति । कषायरक्तप्रतिषेधमाह ॥ बौधायनः ॥ कषायवासाः कुरुते जपहोमप्रतिग्रहान्
न तद्देवगमं भवति हव्यकव्येष्वयोद्धविरिति ॥ आर्द्राम्बरं भेऽव स्नाने च पादशौचे तथार्चने विकिरे पिंडदाने च
वह्नेस्तु चाचमनस्पृत मित्यभिप्रेत्याचामेति । द्विजातीनामाचमनप्रकारमाह ॥ याज्ञवल्क्यः ॥ अद्भिस्तु प्र
कृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः हृत्कंठतालुगाभिश्च यथासंख्यं द्विजातयः शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टा
भिरंततः अंततस्तोष्ठप्रांतेन तत्कुर्याभिमुखः सत्कुर्यात् तदाह नारदः ॥ प्राङ्मुखोदङ्मुखो वापि आचमेत प्रयतेंद्रि
यः त्रिश्चतुर्वा पिबेदापो गंधफेनविवर्जिताः तत्कर्णमप्यनुत्तमं शुद्ध्यर्थमेव एवमाचम्य विवेदा शुद्धिमा
॥ ६कं ॥ शुक्लदिग्वासाः शुचिराचम्य ॥ वेष्टितम् ॥ ६ ॥
प्नोत्युत्तमामित्यभिधानात् ॥ आचमनस्वरूपं नृसिंहपुराणे ॥ दक्षिणं तु करं कृत्वा गोकर्णाकृतिवत्पुनः
त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेदिति ॥ वेष्टितमिति ॥ गोमयोपलिप्तत्वे कृतमंडलकं । तथा चा
ह नारदः ॥ श्राद्धार्थं समनुज्ञातो मंडलं कारयेत्तय मिति । वर्णानां तत्प्रकारमपि ॥ चतुरस्रं ब्राह्मणस्य
त्रिकोणं क्षत्रियस्य च वैश्यस्य वर्तुलं ज्ञेयं शूद्रस्याभ्युक्षणं भवेत् ॥ मंडलकरणं तु गोमूत्रेणेत्यपि मत्स्य
पुराणे ॥ चोक्तं ॥ गोमयेनोपलिप्तायां गोमूत्रेण तु मंडलं अक्षतद्भिः सपुष्पाभिस्तदभ्यर्च्यापसव्यवदि
ति तत्र सपात्रे तन्मंडले सपुष्पाभिरद्भिरभ्यर्च्य तत्र सिंहासनानि स्थापयित्वा पादप्रक्षालना
दि पूर्वकान्ब्राह्मणानुपवेशयेत् ॥ तथा च नारदीयवाक्यं ॥ प्रक्षाल्य विप्रपादांश्च स्वाचांतानुपवे २
शयेत् यथावदर्चनं कुर्यात्स्मरन्नारायणं प्रभुं भिन्नभिन्नासने स्थित्यर्थः ॥ इत्यपि मनुराह ॥
आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक् उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेदिति
गंधादिभिरर्चयेदित्यपि मनुराह ॥ उपवेश्य तु तान्विप्रानासने स्वजुगुप्सितान् गंधमाल्यैः सु
रभिभिरर्चयेद्देवपूर्वकमिति ॥ प्रथमं कस्यासनमिति चेत्तेन विष्णुराह ॥ यथाभ्यो वयः

© Dharmarth Trust. Digitized By eGangotri

कुशोत्तरेष्वासनेषूपवेशयेत् विद्यातपोधिकानां वै प्रथममासनमिष्यते पांक्तयानां तु विशिष्टानां समं गंधा
दिभोजनमिति ॥ तत्रैवानुज्ञामपि ब्राह्मणेभ्यः गृह्णीयादित्युक्तं नारदेन ॥ निमंत्रितेषु विप्रेषु मि
लितेषु द्विजोत्तमाः प्राय श्चित्तं विशुद्धात्मा तेभ्योनुज्ञां समाचरेत् प्रचेतः श्राद्धं करिष्य इत्येवं पृच्छे
३ द्विप्रान्समाहितः कुरुष्वेति सुतैरुक्तो दद्यादर्भासनान्यथा १ पुनरपि निमंत्र नारदेनोक्तं ॥ श्राद्धार्थी १
समनुज्ञातो विप्रान्भूयो निमंत्रयेत् उभौ च विश्वेदेवार्थं पित्रर्थं त्रीन्यथाविधिः देवतार्थं च
पित्रर्थमेकैकं वा निमंत्रयेदिति मार्कंडेयः ॥ पवित्रपाणिराचांतानाशने सूपवेशयेत् युग्मान्देवे यथाशक्ति
पित्र्ये युग्मांस्तथैव च १ युग्मान् प्रांमुखान् अयुग्मानुदंमुखान् यत्तु मनुनोक्तं ॥ द्वौ दैवे पितृकृत्ये त्रीनेकैक
पि॰ मुभयत्र वा भोजयेत्सम्रुद्धोपि न प्रसज्येत विस्तरे तत्तु विप्रसंख्याप्रसंशार्थं नाधिकसंख्यानिषेधार्थं तथा सति ना
धिकसंख्या विधीयेत विधत्ते च ॥ गौतमः ॥ नवावरान्भोजयेयुतोवा यथोत्साहमिति ॥ श्रुतंतः ॥ भोजयेदथवा
प्येवं ब्राह्मणं वं क्रियावनं देवे कृत्यातु नैवेद्यं पश्चात्तस्य तु निर्वपेत् पुराणात्ते एकएव यदा विप्रो द्वितीयो
लोपपद्यते पितृणां ब्राह्मणो योज्यो देवेत्वग्निं नियोजयेत् ॥ वसिष्ठः ॥ अपि वा भोजयेदेक ब्राह्मणं वेदपा

॥ ६ ॥ श्राद्धदेशमागच्छेत् ॥ ६ ॥

रगं श्रुतशीलादिसंपन्नं सर्वालक्षण वर्जितं यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् अन्नं पात्रे समुद्धृत्य स
र्वस्य प्रकृतस्य तु देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत् प्रास्येदन्नं तदग्नौ तु दद्याद्वा ब्रह्मचारिणे ॥ दह
स्पतिः ॥ यद्येकं भोजयेच्छ्राद्धे स्वल्पत्वात्प्रकृतस्य तु स्तोकं स्तोकं समुध्धृत्य तेभ्योन्नं तु निवेदयेत् १
ब्राह्मणत्वप्रिसमर्थानस्य स्तोकं स्तोकं तृतीयं तृतीयं भागं बुध्या पृथक्कृत तेभ्यः पित्रादिभ्यः प्रत्येकं दद्या १
दित्यर्थः १॥ मार्कंडेयः ॥ स्नातः स्नातान्समाहूय स्वान्स्वागते नागतान्द्विजान् स्थितो देशे विविक्ते तु प्र
कीर्णतिलबर्हिषीत्यभिप्रेत्य ॥ श्राद्धदेशमिति ॥ श्राद्धस्य शुभदेशे विविक्ते तु गोमयेनोपलेपयेदिति ।
मनुनोक्तदेशः स्यानत्तमिति । विविक्तग्रहणमपि पितृतुष्ट्यर्थमेव ॥ तथा च मनुः ॥ विविक्तेषु च तुष्यं
ति दत्तेन पितरस्सदा गोमयेनोपलेपनमपि भूशुद्ध्यर्थमेव । तच्छुद्धिस्तु भूशुद्धिर्मार्जनाद्दाहात्काला

© Dharmarth Trust. Digitized By eGangotri

ग्रं= ना:=४

याज्ञवल्क्योक्त प्रकारेण गृहीत तिलान् इत्यर्थः। तद्ग्रहणं च सर्वत्र वसुधापूता लेपो यत्र न विद्यते यत्र लेपः कृतस्तत्र पुनर्ले
येन भुज्यतीति भागवदुक्तेः॥ कं श्राद्धं गच्छेदिति चेदधिकारी सकोचेति चेत्पुत्रादिः॥ पुत्रस्तु नारदेनोक्तः॥ औरसः क्षेत्रजश्चैव
त्र=३ पुत्रिकापुत्र एव च कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च। पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा स्वयं चोपगतः पुत्रा
द्वादशैते प्रकीर्तिताः॥१॥ अत्र यद्यपि क्षेत्रज पौनर्भव कानीन सहोढ गूढोत्पन्ना उक्ताः तथापि कलौ तेन श्रेष्ठा तेषां निंदा श्रवणा
त्तथा च क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव चेति १ दत्तकादयस्तु मध्यमाः
॥ तथा दत्तोऽपविद्धः क्रीतश्च कृतः शौद्रस्तथैव च जातिशुद्धाः कर्मशुद्धा मध्यमास्ते सुतेतरता १ शौद्र इति शूद्राः पुत्रा इति
आदिशब्देन पितृहीनौ पौत्रौ सपुत्रयोरपि पितामह प्रपितामहयोः पार्वणश्राद्धेऽधिकारिणः विति केचान धिकारिणः
इति चेत्तथा याज्ञवल्क्यः॥ न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा न च पाषंडमाश्रिता स्तेनाः भर्तृघ्नश्चैव
स्रो= भर्तृद्रुहश्चैव सुरापाश्चैव योषितः १ स्वोपनयनकाले नोपनयनाः व्रात्या इति निंदितकर्मकर्तारो विकर्मणः इत्यर्थः॥
तत इति॥ तत्रागमनानंतरमुदङ्मुख इति उत्तराभिमुखस्सन् उपविश्येति स्वासने स्थितिं कृत्वेति स्थितिरपि प्रोढपाद

॥ ततो उदङ्मुख उपविश्य सिद्धान्नसंभवे ॥सिद्धमिति पाचकं दृष्ट्वा ॥

रहिता॥ तथा चाह॥ शाट्यायनः॥ श्राद्धमाचमनं होमं भोजनं देवतार्चनं प्रोढपादो न कुर्वीत स्वाध्यायं पितृतर्पणमि
ति॥ सिद्धान्नसंभवे इति॥ सिद्धान्नस्य संभवस्तस्मिन्सति भोजनान्नजाते सतीत्यर्थः सिद्धमिति भोपाचक भोजनं तंजातमिति॥
पाचकमिति पाककर्तारं देवदत्तादिकं दृष्ट्वेति दृष्टीकृत्वेत्यर्थः पाके लौकात्ति पित्रर्थी निर्वपेत्पाकवै श्वदेवार्थमेव च॥ विशे
षमाह॥ पैठीनसिः पितृपाकं समुद्धृत्य वैश्वदेवं करोति च आसुरं तद्भवेच्छ्राद्धं ततोन्वाहार्यकं बुध इति॥ उक्तं च॥ स्थित्वा चोदङ्मु
खः क्रीडं वाप्यासने सर्षपान्तिलान्विकरेत्पाचकं दृष्ट्वा सिद्धं पितॄंश्च पूजयेत् १ तत्र ब्रह्मांडपुराणेपि तत्र सिद्धार्थिका भूमौ
वेदज्ञो यत्नतः क्षिपेत् सर्वासु च तिलान्मंत्रेणानेन धर्मवित्॥ अनेनेति नमो नमस्ते इत्यादिना। नमोनमस्ते गोविंद पुरा
णपुरुषोत्तम इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिश॥ इत्युक्तप्रकारेण प्रथमतः॥ सर्वासु दिक्षु गौरसर्षपान् विकिरेत्॥ उक्तं च
गौरसर्षपमादत्ता दिक्षु सर्वासु बुद्धिमान् दुष्टेभ्यः श्राद्धरक्षार्थं पश्चात्तु विकिरेत्तिलान्॥ अपहता इत्यादिमंत्रेण तिलान् विकिरे
त्। तथा च नारदेनोक्तं॥ ब्राह्मणानां च मध्ये तु द्वारदेशे च सत्तमाः अपहता इत्यृचा तु कर्त्ता च विकिरेत्तिलान् ब्राह्मणा

नां प्तिसं तिलानां मध्ये इ तिल तिलासमस्थाने हारिका इष्ट तिलाश्च स्युः॥

© Dharmarth Trust. Digitized By eGangotri

चारस्यानंतरेत्यर्थः । सिद्धं किंवाचकं पृष्ट्वा रत्नार्घं घृतदीपकं अपवित्रेतिमंत्रेण दत्वाथ स्तूनि सिंचयेदिति । किमिति वाक्यालंकारे र
त्नार्घं दीपकं रत्नादीपकं दत्वेति प्रज्वाल्येति तैलेन घृतेन वारीयमित्यपि घृतेन दीपो दातव्यः तिलतैलेन वा पुनः इत्यपि पुराण
४ समुच्चये ॥ उक्तं ॥ वस्तूनि देवपेयः कर्मसंबंधीनीति नाम्नो ह्रितं स्पृशेत् किंच्चित् देवे पित्र्ये वा पुनः उत्तरेण हरेद्वेद्यादह्निले
न विसर्जयेदिति वाक्येन आङ्गारं मे आङ्गीयवस्तुसेक आङ्गौ ॥ अपवित्र इत्यादि ॥ मंत्रजलाभ्यां शौचादिक्रियारहितस्सन्नपि
पवित्र इति ॥ पूर्वोक्तक्रियादियुक्तम्ब सन्नपि सर्वावस्थामिति सर्वाया अवस्थासंसर्गाद्यवच्छिन्ना अशुचिदर्शनासंभाषाभा
५ षणस्तुतजं भणस्था अवस्थांतरानामिति गत इति गतः प्राप्तस्सन्नपि यः कश्चिज्जीवविशेषः स्मरेत् स्मरणं कुर्या
दिति कमित्याकांक्षायां पुंडरीकाक्षमिति पुंडरीकं हृदयकमलमद्धोतिव्या ... व्याप्त्यं तर्यामिरूपेणेति पुंडरीको
ययदा देहं व्याप्नाविति धातोः कर्मण्यवतीति प्रत्यये सति सेति यद्वा हृदयं पुंडरीके अक्षवत् योभिनां स्फुटतया प्र
काशत इत्यतः पुंडरीके अक्ष इव पुंडरीकाक्षः सप्तमीतियोगविभागात्समासः हृत्पुंडरीकं पुरमध्यसंस्थमिति श्रुतेः ।

॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥

यद्वा पुंडरीकसकाशे शुभे अक्षणी यस्य स पुंडरीकाक्षस्तमिति स जंतुः बाह्याभ्यंतरः बहिरंतरः स्थूलसूक्ष्मदेहद
यावच्छिन्नः शुचिः शुद्धो भवतीति इत्यर्थः पूर्वं रत्नार्घकं दीपं प्रस्थाप्योदङ्मुखः कुशैः पुनातु पुंडरीकाक्षः चोक्षाव
स्तूनि सेचयेदित्युक्त्या ॐ मित्यादिमेमिति अवत्युपसिकानिति अवरक्षण इत्यस्य मन् प्रत्ययांतस्य रूपमि
ति पुंडरीकाक्षो नारायणो पुनातु पवित्रं करोत्विति कुशाग्रयानीतजलैरिति एककुशा वा द्विशोत त्र
त्रणावत्युच्यते बुधैः त्रिशाखश्च भवेद्दर्भ चतुःशाख कुशः स्मृत इत्यादिवाक्योक्तानां ग्रयं तेनाना
नीतानि जलानि तैः आङ्गीयवस्तूनीति आङ्गीयानि वस्तूनि सिंचेदिति ॥ यद्यपि ब्राह्मणं कश्चित्पुंडरीका
क्षोच्चारणे न कश्चित् ॥ शंखचक्रधरं देवं द्विभुजं पीतवाससं प्रारंभे कर्मणो विप्रः पुंडरीकं स्मरेद्धरि ॥
मित्यत्र स्मरणेन विहितमस्ति तथाप्युच्चारणे श्रवणमायात्येव ॥ ॐ पुंडरीकाक्षः पुनात्विति उक्त्वा
ङ्गीद्रव्यसेक इति ॥ संकल्पकरणमपि वाक्यानुकूलमेव तथा च । सेकं तु विधिवत्कृत्वा कुर्यात्संकल्प

शि॰ व॰ ४

© Dharmarth Trust. Digitized By eGangotri

कुशान्वित इति ध्वतमोटकः तथाहि । वामेवहू कुशानां त्वाद क्षिणे त्वान्वेकरे मोटक इति संज्ञाश्च करोतु पितृकर्मणि
पितृकर्मणामिति कर्मणि षष्ठी पितृकर्मणि कुर्यादित्यर्थः ॥ व्यासः ॥ सर्वत्रायुदक पूर्वाणि दानानितु यथाश्रुतिरि
ति यतएव मतं ततइति सेकानंतरं कुशत्रय तिलजलयुक्तैः संकल्पं कुर्यादितिस्पष्टमेवेति ॥ संकल्पदारे च विप्रा
दिद्रव्यमश्नुते ततस्तत्करणं युक्तं गृहीत्वा वरुणे दानं ममहस्ते प्रयच्छति अहं च भास्करं दद्या भास्कराणो श्नुते ध्रु
वमिति ॥ भगवदुक्तेः तत्करणमिति भगवदुक्ते तत्करणमपि ज्ञानं त्वोरंतरं श्रेष्ठं तथैवोक्तं व्यासेन ॥ आर्द्र
वासास्तु यः कुर्याज्जपं होमं प्रतिग्रहं सर्वं तद्राक्षसं विद्याद्दक्षिजानुच यत्कृतं तिलास्तु प्रशस्ताहि तिलाश्यामा
नतु श्वेता निषेधतः अतएव नरव्याघ्र प्रशस्तैः कार्यमाचरेदित्युक्तवाक्योक्त प्रकारेण श्यामा एव श्रेष्ठा ।

ॐ पुंडरीकाक्षः पुनात्विति कुशत्रयानीतजलैः श्राद्धवस्तूनि सिंचेत् ततः कुशत्रय तिल
जलैः संकल्पं कुर्यात् ॥ ॐ मद्यामुक मासे ऽमुक पक्षे ऽमुक तिथौ अमुक गोत्राणां पितृपिता
मह प्रपितामहानाममुकामुक शर्मणां द्वितीय गोत्राणां मातामह प्रमातामह वृद्धप्र
मातामहानाममुकामुक शर्मणां पार्वणश्राद्धमहं करिष्ये ॥

इति । ब्राह्मणेनेतेनवेदाश्च यज्ञाश्च विहिताः पुरा तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः प्रवर्तंते विधा
नोक्ताः सततं ब्रह्मवादिनामिति ॥ भगवदुक्तवाक्याभिप्रायमाश्रित्य ॥ ॐमिति ॥ मासपक्षतिथीनां च
निमित्तानां च सर्वशः उल्लेखनकुर्वाणो न तस्य फलभाग्भवेत् इति गरुडपुराणवाक्यमनुसृत्य ॥ अद्यामु
कमास इत्यादि अद्येति वर्तमानकाल इत्यर्थः अन्यत्सर्वं स्पष्टमितिन स्येति मासाद्युल्लेखरहितस्य सं
कल्पस्येत्यर्थः नांदीमुखे विवाहे च प्रपितामहपूर्वकं वाक्यमुच्चारयेत् प्राज्ञस्त्वन्यत्र पितृपूर्वक
मित्याचार्योक्तिमाहृत्य अमुकगोत्राणां पित्रित्यादि पित्रीति पाते स्तजं तं रूपमिति मातृपितृमर्या
डामहच इतिशास्त्रमाश्रित्य एकलोपे सति पितुः पिता पितामहः तत्पिता प्रपितामह इति पिता
महश्च प्रपितामहश्च ते पितृपितामहप्रपितामहास्तेषामिति शर्मादिशब्दप्रदानमपिवाक्या

© Dharmarth Trust. Digitized By eGangotri

पिंडीकरणादूर्ध्वं शर्मवर्मादि भाग्भवेत् इत्यतः शर्मणामित्येव मन्त्रे पीत्यर्थः शर्माधिकारिणो विप्राः स
वेदाज्ञानभागिनः क्षत्रियेवर्मशब्दोयं कवचस्य प्रधारणात् इतरेष्वपि गोणत्वादीयते वर्मशब्दानामि
त्यादिवाक्येभ्यो ब्राम्हणादेः शर्मादिपदं दात इत्यभिति स्यादानं दायुशजंदशर्मशांत सुखाभिचेत्यभिधा
नात् सुखवचनः शर्मशब्दस्तदधिकारिणो विप्रादावेत्यर्थः वर्मशब्दः कवचवाचीव र्मणाछादयामीति
श्रुते स्तदधिकारः क्षत्रियादेर्मुख्यो गौणस्तयेत्यर्थः वस्तुतस्तु गुप्तशब्दस्तु वैश्ये स्यात्कृष्यादीनां च र
क्षणात् शूद्रके दास इत्याहुः सर्वेषां परिसेवनादित्यतो वैश्य गुप्त इति शूद्रे दास इति ॥ विष्णुपुराणेपि ॥
शर्मवद्ब्राम्हणस्योक्तं वर्मेति क्षत्रसंयुतं गुप्तदासात्मकं नाम प्रशस्तं वैश्य शूद्रयोरिति ॥ उपविश्य जपेद्वी
द्वी मान् गायत्रीं तदनुत्तरेति ॥ ब्रम्हपुराणीय वेचनान्ततइति ॥ संकल्पकरणादनंतरं । गायंतं गाय
ते इति गायत्री तां जपेज्जपनं कुर्यादिति प्रणवव्याहृति पूर्वकं एव श्रेयात् । तथाहि ॥ प्रणवं पूर्वमुच्चार्य भूर्भुवः स्वस्ततः परं

ॐ ॥ ततो गायत्रीं जपेत् ॥ देवताभ्य पितृभ्यश्च महायोगिभ्य एव च नमः ॥ शुभम् ॥ ॐ

गायत्रीं प्रणवं चांते जपं त्वेवमुदाहृतमिति याज्ञवल्क्यात् ॥ यद्यप्यत्र वार संख्या नोक्ता तथापीग्रंथांतरीया
ग्रहीतव्या सुगमेति ॥ सोपाने त्रिरितिस्फुटमेवोक्तं तत्र जपकरणं श्रेष्ठमेव ॥ जपस्तु सर्वधर्मेभ्यः परमो धर्म उ
च्यते ॥ अहिंसया हि भूतानां जपयज्ञः प्रवर्तते यज्ञानां जपयज्ञोस्मीत्यादिवाक्येभ्यस्त छेष्ठत्वाभिधाना
दिति ॥ संकल्पपूर्वकं जप्त्वा गायत्रीजपमुत्तमं देवताभ्यस्त्वनु मंत्रं त्रिवारं च जपेत्सुधीः ॥ ब्रम्हपुराणेपि मं
त्रं वक्ष्याम्यहं तस्मादमृतं ब्रम्हनिर्मितं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वधायै स्वाहायै नि
त्यमेव नमो नमः ॥ आद्यावसाने श्राचम्य त्रिरावर्त्त्य जपेत्सदा पिंडनिर्वपने वापि जपेदेतत्समाहितः ॥
मध्यमानाभिदं कृत्वा श्राद्धकालेउपस्थिते पितरस्त्रिप्रमोयांति राक्षसाः प्रद्रवंति वेत्युक्तेः ॥ देवताभ्य
इति । देवस्य भावो देवताभ्यः पितृकर्मसंबंधिभ्यः यद्वा सर्वेभ्यो देवताभ्यः पितृभ्यः अग्निष्वात्तादिभ्यो महा
योगिभ्य एव चेति महातेजसो योगिनस्ते महायोगिनस्तेभ्यो नमो नम्रीभावो
ऽस्तु । स्वाहाया इति । स्वाहा च हुतभुक्प्रियेत्यभिधानादग्निप्रिया यद्वा स्व
अग्निपितामह जिह्वीतेग छत्याहुतिरूपेण यामास्वाहा तस्यै स्वधाया इति ॥
॥ पितृध्यान ॥

दीयमानद्रव्यजनितत्वात् तद्रूपा स्वधा तस्यै नित्यमेव निरंतरमेव नमो नमः पुनः पुनरुक्तिरादरार्था इति यत्तु नमः स्वधायै स्वा
हायै नित्यमेव भवंत्विति सामगैः पठ्यते तत्तु तेषामेव यद्वचनं न त्वस्माकमिति अस्माकं तु रूपद्वयं वश्यया निति अ।
यथो पुनरवधारणार्था इति विर्जपेदिति स्पष्टमेवेति तेषामेव मारहमूतं तु पूर्वं दैवं नियोजयेत् रक्षोघ्नं विप्रलुंपंति
श्राद्धमारक्षवर्जितमिति मनूक्तेः ॥ पूर्वं दैवकृत्यं श्रेष्ठमतः तत इत्यादि तत इति जपानंतरमुत्तराभिमुखस्सन्दक्षि
णोत्तरयोः ॥ क्रमेण सिकतादिभिरासादिते कल्पिते पूर्वाग्रकुशत्रयात्मके पूर्वाग्रं यत्कुशत्रयं तदात्मके आसने दयेरुते।
प्रथमं दक्षिणमासनमुत्सृजेदिति संकल्पं कुर्यादिति ॥ शातातपः ॥ इदं मुखलसु देवानामिति ॥ उत्तरे क्षितसंयुक्तान्पू
र्वाग्रान्विन्यसेत्कुशान् दक्षिणं पातयेज्जानुं देवान्परिचरन्सदा ततो दक्षिणजानुपातमपि कर्तव्यमिति प्रचेताः।
श्वे= दर्भैर्विनासनं दद्यान्न तु प्राणोकदाचन पितृदेवमनुष्याणां स्यात्तुष्टिः शाश्वती तथा दैवे तु कृतत्रयो दर्भाः प्रदातव्या

स्वाहायै स्वधायै नित्यमेव नमो नमः । इति विर्जपेत् ॥ तत उत्तराभिमुखो दक्षिणोत्तरक्रमेण सादित
पूर्वाग्रकुशत्रयात्मकासनद्वये प्रथमं दक्षिणमासनमुत्सृजेत् ॥ कुशत्रययवजलान्यादाय ॥ ॐ
मद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वे
देवा इदमासनं वो नमः ॥ इति कुशत्रययवजलेरुत्सृजेत् ॥ एवं ॐ मद्यामुकगोत्राणां माता
मह प्रमातामह वृद्धप्रमातामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवाः इदमास

पृथक् पृथक् तदपि समूलस्त्रयस्सः समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि मूलेन लोकाञ्जयति शक्रस्य तुम
हात्मनः ॥ विश्वेदेवानामासने कुशसंख्यामाह । देवलः ॥ प्राङ्मुखान्यासनान्येषां द्विदर्भाग्राणि तानि चेति ॥
वे= एषां विश्वेदेवानामिति । यत्र बहवो ब्राह्मणास्तत्र विश्वेदेवासनद्वये प्रत्येकं द्वे कुशे यत्र तु तं वतात तत्र विश्वे
श्वेदेवासने कुशचतुष्टयमिति तत्र ब्राह्मणानुपवेशयेत् ॥ द्विजाभावे गतिमाह ॥ हारीतः ॥ विधाय वा
दर्भवटुमासनेषु समाहितः प्रैषानप्रैषसंयुक्तं विधानं प्रतिपादयेदिति स्वयमेव प्रैषानुप्रैषं कर्तव्यमि
त्यर्थः यवैः दर्भैश्च विश्वेषां देवानामिदमासनं देवेति भूयो दद्याच्च दैवे क्षणं ॥ इति दैनारदीयाभिधा

© Dharmarth Trust. Digitized By eGangotri

यवकुशत्रयजलानीति ॥ यवकुं कुशत्रयजलानीति यवश्च कुशत्रयं च जलं च तानि आदायेति संकल्पार्थमद्यादौ गृही

त्वेति अदनयासनयोः सप्तमी द्वितीयावाहनेस्मृता अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृता इत्यभिधानात् अद्या

मुकगोत्राणामित्यादि अन्नदाने इति दार्थे तत्र इत्यर्थः वो गुणमभ्यमिति कुशत्रययवजलैस्तत्स्रजेदिति देवती

र्थेन संकल्पं कुर्यादित्यंगुल्यग्रे तीर्थं दैवमित्यधावनादंगुलीनामग्रे देवसंबंधिनीत्यर्थमित्यर्थः ॥ तथा च नारदः ॥

देवेश्च समनुज्ञातो यजेत्पितृगणं तथा ऽतिसंयुक्तदर्भेश्च दद्यात्तेषां तथासनमिति तेषां पितृणामासनमित्यर्थः तदा

सनकरणं तदासने कुशसंख्यामाह ॥ देवलः ॥ दक्षिणमुखयुक्तानि पितृणामासनानि च दक्षिणाग्रैकदर्भाणि प्रो

क्षितानि तिलैः सहेत्यथ च यत्र वेदत्वो पित्र्यो विप्रा स्तत्र पितामहाद्यासने षेकैकं प्रत्येकं यत्र तु तंत्र तास्तु ग्रयैत्रे कुशत्रये

ततोऽपसव्यं कृत्वा पातितवामजानुर्दक्षिणाभिमुखो द्विगुणभुग्नकुशत्रयतिलजलान्यादाय पूर्व

पश्चिमक्रमसाधितमेष्टकरूपाणि षडासनानि तिलजलप्रोक्षितानि प्रत्येकं पित्रादिभ्य आरभ्य

उत्सृजेत् ॥ तत्र क्रमः ॥ ॐ मद्यामुकगोत्र पितरऽमुकशर्मन् पार्वणश्राद्धे इदमासनं ते स्वधा ए

वमेव पितामहादिभ्यः पंचभ्योऽपि दद्यात् ॥

मिति निष्कर्षः दक्षिणाभिमुखः पश्चात्पातितो वामजानुः कः सतिलं जलमादाय द्विगुणभुग्नकुशत्रयं ॥ प्रा

ङ्पश्चिमक्रमेणैवासादितानि षडासनानि पित्रादिभ्यश्च प्रत्येकं प्रोक्षितानि तिलैर्जलैः आरभ्य पश्चिमात्कुर्या

त्संकल्पं चापसव्यतः अपसव्येन पितृभ्यो दानं श्रेष्ठतमं स्मृतं प्रयोगविधिजात्स्त्वादेवासव्येन सर्वदा तेनैव

पितरस्तृप्ता अपसव्ये कृत्ये सतीत्यादिवाक्येभ्यस्तत इत्यादितत इति वैश्वेदेवासनोत्सर्गानंतरं पाति

तो वामजानुर्येन स अयं स्वभावनिर्देशः पितॄणामेवं स्वभावाः पितरो भवंतीत्यभिप्रायः ॥ तथा च कृतिः ॥

आचाजानुः दक्षिणतो निपद्यैमयज्ञमभिगृणीते सर्वे ज्ञान्या चासीदं त्रिरिति च ॥ शातातपः ॥ उदं

मुखस्तु देवानां पितॄणां दक्षिणामुखः प्रदद्यात्पार्वणे श्राद्धे देवपूर्वं विधानतः इत्यभिप्रेत्येत्या

पि दक्षिणामुख इति । शौनकः ॥ अथेषः प्रदाय दर्भांश्च द्विगुणभुग्नानासने प्रदायेत्यभिप्रेत्याप्रिपि

द्विगुणभुग्नेति द्विगुणभुग्नं यत्र कुशत्रयं च तिलश्च जलं च तानीति पूर्वपश्चिमयोः क्रमेणेति

जा

तिलजलैः मिश्रत्वता प्रत्येकमेकं पितृतीर्थेन संकल्पं कुर्यादिति ॥

श्राद्ध० १६

© Dharmarth Trust. Digitized By eGangotri

मध्यमांगुष्ठांगुष्ठयोः येत्रमित्यभिधानात् अंगुष्ठतर्जन्योः मध्यमयेत्रमिति वैश्वदेवं च यत्कृत्यं कुर्यात्सव्येन सर्वदा इत्युक्तं तत इत्यादि ॥ वि
ष्णुसव्यमिति विश्वान्देवांस्तथा पितॄन् आवाहयिष्ये ॥ अपात्रके ॥ वाक्यमुच्चारयेत्पूर्वं पश्चादावाहनं स्मृतं पाणिप्रक्षालनं दत्वा वि
ष्टरार्थान्कुशासनात् आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचेत्यभिधानात् ॥ ॐ विश्वानित्यादि ऽऽवाहयिष्ये इत्यावाहनं करिष्ये ॥
सपात्रके त्वहत्य वा चकेपिस्याद्दिति ॥ आवाहयेत्ततो देवान् विश्वेदेवास इत्यृचेति वाक्याभिप्रायमाश्रित्य विश्वेदेवास इत्यादि हे वि
श्वेदेवासः दक्षस्य दुहिता पुत्र्या विश्वानामेति विश्रुता विधिवत्सापि दक्षेण दत्ता धर्माय धीमते तस्य पुत्रा महात्मानो विश्वेदेवा
इति स्मृता ॥ इत्युक्तः हे विश्वापुत्राः यूयं मेममेमं हवं हूतिं हवो हूता वितिकोशात् हूतिराकारणं स्थानमित्यभिधानादा
ह्वानं शृणुत श्रवणं कुरुत श्रुत्वा चागत आगच्छत आगत्वा चेदं बर्हिः कुशमानिषीदत तदाश्रित्योपविष्टा भवत

ततस्सव्यं कृत्वा ॥ ॐ विश्वान्देवानहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवासः आगत शृणुत मइमं हव
म् एदम्बर्हिर्निषीदत इत्यनेन देवानावाह्य ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः इति यवान्विकी
र्य ॥ ॐ विश्वेदेवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उपद्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्राः

युष्माकमासनार्थे कल्पितेषु कुशेषु उपविष्टा भवतेत्यर्थः अत्र विश्वेदेवास इत्याज्जसेरसुगिति सुगागमः । शृणुत इति
तस्थस्थमिपां तांतंताम इति सूत्रेण थस्य तप्रादेशः आनिषीदतेति व्यवहितेनाङा संबंधः छन्दसि ये व्यवहिताश्चेति
पाणिन्युक्तेः आगतेति गमेः रूपमिति अनेन मंत्रेणेति सपात्रके तु ब्रह्मपुराणे विधिरुक्तः ॥ देवानावाहयिष्येते प्राहु
रावाहयस्व च विप्रांगुष्ठं गृहीत्वा तु विश्वेदेवान्समाह्वयेत् ततो मंत्रं जपेन्नी विश्वेदेवास आगत इति तृतीयं च जपेन्मं
त्रं विश्वेदेवाः शृणुतु च जपेन्मंत्रं तृतीयं तु पौराणं पुण्यवर्धनमेव विश्वेदेवास आगतेति ॥ गायत्र्या प्रजापतिदृष्ट नमो =
या विश्वान्देवानावाहयेति ॥ देवास्त्वावास्त्वेवेदत्तायवा मंत्रेण प्रीतितः विपक्षाणां विनाशाय विश्वेदेवास्ततो जपे
त् यवोसीत्यादि हे यव त्वं यवोसि पृथक्करणे स्वतोस्मद्द्वेषो मम कृत्रिम शत्रून्नन्योन्यभिन्नान्संहित रहितान्
कुरुत दृढरातीरस्मत्सहिजाहितान्यवयत थाकुरु यतस्त्वं पृथक्कारी तस्मोच्छत्रून्नुस्मदधीनेपिपृथक्कुर्विति
र्यः भेदनार्थत्वे धातूनामनेकार्थत्वादिति ॥ युमिश्रिणे इत्यस्य इयं यव इति अचोघ्नि जिति शास्त्रेणेत्यरातिशब्दः ॥

© Dharmarth Trust. Digitized By eGangotri

श्रीमलेनोपवेदे द्वितीयं च जपेन्मंत्रं विश्वेदेवा स शृणुतेत्युक्ते हे विश्वेदेवा ते यूयं मेममेमं हवमाह्वानं श‍ृणुत श्रवणं कुरुत तेकेये
यूयं मंत रिक्षेस्थ तिष्ठथ ये चोपसमीपे द्यावि द्युलोके स्वर्गेस्थ ये चाग्नि जिह्वा अग्निरेव जिह्वा हवि र्भोजनसाधनं येषां ते उत
वा ये यजत्राः यजंते श्राद्धकर्तारं गायं तइति पुरूरवामाद्रैव प्रभृतयः किंचास्मिन्बर्हिषि कुशेष्वासद्यासन्ना भूत्वा मादयध्वं
हृष्टा भवत कुशकल्पितासने स्थित्वा प्रसन्ना भवत इत्यर्थः यजत्रा अग्नि जिह्वा ये ये च कुत्राकवाहिता येते दिवि स्थिता
देवा श्रुत्वाह्वानं मदंतु ते इत्युक्तं मादयध्वमिति मुदहर्षे इत्यतः स्वार्थे णिच् आगच्छंत्विति ये यत्रेति क्रतुदक्षौ वसुसत्यौ॥
कामकालौ ध्वलोचनौ पुरूरवामद्रैवैव श्वैव शोकोनाकसदस्तथेत्युक्तेषु विश्वेदेवेषु ये विश्वेदेवा यत्र द्रष्टिं श्राद्धादौ वि
हिता स्तेपुरूरवामाद्रैव श्रवाद्वये परिकीर्त्तिता वित्यभिधानोदनौ वेताविव पूजनीया विति स्वष्टमन्यदिति॥ ब्रह्मपुरा
णे॥ पितॄन्नावाहयिष्येहं शोषावितृप्तान्नरोत्तम आवाहस्वेत्युक्तस्तैः सावधाना भवं त्विति ति पितॄनिति सावधानौ ना
भवं त्विति कर्त्ता ब्रूयात् ईउशंत इत्यृचावाह्य पितॄन्विप्रः समाहित इत्यत आह॥ उशंत इत्यादि हे अग्ने वयं त्वा यक्षा पितृ
क्षानमुशंतः इच्छंतः त्वा त्वामग्निं निधीमहि आदधामं तवाधानं कुर्म इतियावत् किंचोशंत एवत्वा मग्निं समिधीमहि

आसाद्यास्मिन्बर्हिषि मादयध्वमिति जपेत्॥ ॐ आगच्छंतु महाभागाः विश्वेदेवा महाबलाः ये यत्र विहिताः
श्राद्धे सावधाना भवंतु ते॥ इति श्लोकं पठेत्॥ ततोपसव्यं कृत्वा॥ दक्षिणामुखः पितॄन्हमावाहयि
ष्य इत्युक्त्वा॥ ॐ उशंतस्त्वा निधीमह्युशन्तः समिधीमहि उशान उशतऽआवह पितॄन्हविषेऽ
अत्तवे॥ इति पितॄनावाह्य ॐ अपहताऽसुरा रक्षांसि वेदिषद इति तिलान् विकीर्य॥

प्रज्वालयामः॥ तेनत्वं पितॄनावाह आकृयत्वं किंभूतः उशन् कामयमानः हविरितिशेषः उशन्वैवाजश्रवस इतिश्रुतेः
पितॄन् किंभूतानुशत इच्छतः श्राद्धीयं हविरितिशेषः आकाने किमर्थमित्याह॥ हविषे अस्मद्दत्तहविर्भिमिंतंत
दपि किमर्थमत्तवे अदनाय अत्तवे अदनायहविषे इत्यत्र षष्ठ्यर्थे चतुर्थी तथा च हे अग्ने एव मादोधित स्त्वमस्म
त्पितॄनावाहयेति वाक्यार्थः हूयते इति हविः हुदानादनयोरित्यस्माद् र्चिंबुह्यसपीत्यादिना इभि प्रत्ययो तिभि
ते चतुर्थीति अत्तवे इति तुमर्थे तवेङ् प्रत्ययः उशंतस्त्वेत्यनुष्टुपादमेन दृष्टया पितृदेवत्यया पित्रादीनावाहयेदि
ति पितॄनावाह्य तु पश्चात्कृतीये तिलान् क्षिपेत्॥ ब्रह्मपुराणे॥ ततस्तिलान्गृहीत्वास्मिन्विकिरेच्च वदन्निदं श्रद्धयावरया
युक्तो जपेदपहतेतिवित्यभिप्रेत्या पहताइति असुरोपहता तिलप्रक्षेपलोयसौरितिः सत्विति आहुरा दानवादैत्या
विद्रवंति तिलैस्तथेति भावेन गवदुक्तेः॥ किंभूता वेदिषदः वेदिं श्राद्धवेदिकेता भूमिस्तत्रसीदंती ति वेदिषदः न केवल
मसुराः किंतु रक्षांसि राक्षसाश्चापसारिताः सन्तु तथा च सति तिलैः प्रहते
वएवासुरादयः श्राद्धस्यानादयसं त्विति वाक्यार्थः॥

© Dharmarth Trust. Digitized By eGangotri

तथा च पुराणे ॥ द्विजाश्च सव्यं च तिलान् पितॄन् ध्यायन् समाहितः जपेदायंतु न इति मंत्रं सम्यक् श्रोत इत्यभिप्रेत्य ॥ आयंतु नः पि
तर इति नः अस्माकं पितरः अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवता इति स्मृत्युक्ताः
आयंतु आगच्छंतु किंभूताः सोम्यासः सोम्याश्च विप्राणामेव निर्दिष्टा इति स्मृतेः सोमपाः सोमपास्तु कवेः पुत्रा इति स्मृतेः
कीदृशाः अग्निष्वात्ता अग्निना सुष्ठु यथास्यौ देवमाता भक्षिता श्रोत्रस्मार्ताग्निदाधा इत्यर्थः तादृशा एव श्राद्धयोग्या भवंती
त्यभिप्रायः ॥ अग्निष्वात्ताश्च देवानां मारीच्या लोकविश्रुता ॥ इति स्मृतेः ॥ कैरागच्छंतु पथिभिः कीदृशैर्देवयानैः देवानां या
नैः संचारो येषां इत्यर्थः आगत्य चास्मिन् यज्ञे श्राद्धयज्ञे अस्मानधि ब्रुवंतु अधिकं ब्रुवंतु श्लाघ्यं तामित्यर्थः पितरः कीदृशाः स्वध
या स्वधा पितॄणामन्नं सुष्टु तया आदधाति पोषयति पितॄनिति स्वधा तया मदंतः हृष्टाः प्राप्ताः किंच न केवलमधि ब्रुवंतु

ॐ आयंतु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधि ब्रुवन्तु तेऽवन्
॥ त्वस्मानिति जयेत् ॥

किं त्वस्मान् ते पितरोऽवंतु च रक्षंतु सोमपाग्निष्वात्तादयः पितरः आगत्य मां श्लाघ्यं तां रक्षंतु चेति वाक्यार्थः आदिशब्दे
न मत्तोर्हिरण्यगर्भस्य ये मरीच्यादयः सुता स्तेषां ऋषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः विराट्सुताः सोमसदः सा
ध्यानां पितरः स्मृताः अग्निष्वात्ताश्च देवानां मारीच्या लोकविश्रुताः दैत्यदानवयक्षाणां गंधर्वोरगरक्षसां सुप
र्णकिन्नराणां च सुकालिनः सोमपास्तु कवेः पुत्राः हविष्मंतोंगिरः सुताः पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सु
कालिनः अनग्निदग्धा नग्निदग्धा त्काव्या नर्वर्हिषदस्तथा अग्निष्वात्ताश्च सौम्याश्च विप्राणामेव निर्दिशेत्
॥ य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः तेषामपीह विज्ञेयं पुत्रपौत्रमनंतकमित्यादि स्मृतेः आश्वाः त
था च आयंतु न इति त्रिष्टुभं श्री बृहस्पतिः पितृदेवत्यं जपेत इति ॥ आसाद्य पात्रद्वितयं दर्भशाखासमन्वितं
मिति नारदोक्तेः ॥ तत इत्यादि ॥ पवित्रयुक्ते पिविधे देवार्थमिति शेषः ॥ पात्रं तु प्रजापतिराह ॥ सौवर्णं रा
जतं ताम्रं खाड्गं मणिमयं तथा यज्ञियं च समं वापि अर्घ्यार्थं पूजये बुधः दर्भशाखासमन्वितं पवित्रयुक्तं
पवित्रे स्थ इति मंत्रेण द्वे पवित्रे च कारयेत् इति याज्ञवल्क्योक्तरीत्या कर्तव्यमिति ॥ मंत्रं तु पवित्रे ॥

© Dharmarth Trust. Digitized By eGangotri

८ स्यावेत्याद्यो सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति। तिस्रस्त्वपि शलाकास्तु पवित्रेस्य
इति द्विवचनांत एवं योकृत्य इति तल्लक्षणं॥ अनंतगर्भके साग्रेकोश प्रादेश संमिते॥ तत्र विशेषमाह॥ यज्ञ
पार्श्वः द्वेद्वे शलाके देवानां पात्रे कृत्वा त्वयः क्षिपेत् शन्नोदेव्यायवोसीति यवान् पितृतः क्षिपेत्। पुष्पधूपादि
भिः कृत्वा पूजां पात्रेषु मानवः पात्राण्यासये त्रीणि ह्यर्घ्यार्थं पूर्वं च द्विजा इति पुराणवाक्याभिप्रायमाश्रि
त्या पसव्येनेत्यादि॥ त्रीणि तंत्रस्य निरुत्यर्थमेवैतत्प्रसंगेन यत्र यत्र तंगता निषेधस्तत्सर्वमाह॥ कात्या
यनः॥ अर्घेत्वोदके चैव पिंडदानेवनेजने तंत्रस्य विनिवृत्तिः स्यात् स्वधावाचनके तथा इति एवं सति
गयाणामेकद्विजो पवेशने एकस्य वा गयो पवेशने अर्घपात्राणि त्रीणि त्रीण्येव न द्विजसंख्ययेति स्पष्टं
तथा च वैवाजवापः॥ त्रित्वात्पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित् एकस्मिन्वा बहुषु वा ब्राह्मणेषु य
थाविधीति अर्घ्यार्घमिति पितॄणामिति पूर्ववद्देवार्घपात्रवदिति॥ तत्र विशेषमाह॥ यस्तपार्श्वः पि
तृपात्रे विप्रेषोयं तिलोसीति तिलान् क्षिपेत् तिस्रस्त्रिस्त्रः शलाकास्तु पितृपात्रेषु पार्वणे शलोकादमित्रमिति॥

॥ ततः सव्यं कृत्वा देवार्घपात्रद्वये पवित्रं धृत्वा अपसव्येन पित्रार्घपात्रेषु प्रत्येकं पवि ॥
त्रकं धृत्वा सव्येन देवार्घपात्रद्वये ॥ ॐ शन्नोदेवी रभिष्टय आपो भवंतु पीतये शंयोर
भिस्रवंतु नः॥

तत्पात्रे सेचयेत्तोयं शन्नोदेवीति द्विजा इत्यभिप्रेत्य सव्येनेत्यादि तत्पात्रे इति। देवार्घपात्रे इति शन्नोदेवीरि
ति। आपः नोस्माकं पितृणामिति शेषः शं भद्रं भवंतु किंभूता आपः देवीः स्तुतिक्रीडादियोग्या कि
मर्थमित्यपेक्षायामभीष्टय उपचर्यार्थं पीतये पानायच किंच नः पितृणां शं शंयोः कल्याणयोग्याया
भिस्रवंत्विति शंय्वोमिति शंशब्दान्मत्वर्थीयो युस्प्रत्ययः चतुर्थ्यर्थे षष्ठी १ शन्नोदेव्याजलं क्षिपेत्
युक्तेः अपसव्येनेत्यादि यवोसीति यवान् क्षिपेत्युक्तेः ततः सव्यमित्यादि तिलोसीति तिलान्क्षिपेदि
ति नारदोक्तेः। तिलोसीति॥ हे तिल त्वं तिलोसि सोमदैवत्यो पवित्रका इति भगवदुक्त्या प्राह त्रीणिप

[illegible]

© Dharmarth Trust. Digitized By eGangotri

श्री रणवीर पुस्तकालय * मंदर श्रीरघुनाथ जी *
नं. ५५
नं. ५४

© Dharmarth Trust. Digitized By eGangotri